# Nrsimha Mrityunjaya Stotram

मार्कण्डेय उवाच

नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति ॥ १ ॥

गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवं च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ २ ॥

वासुदेवं जगद्योनिं भानुवर्णमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ३ ॥

भूतात्मानं महात्मानं जगद्योनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ४ ॥

सहस्रशिरसं देवं व्यक्ताव्यक्तं सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ५ ॥

इत्युदीरितमाकर्ण्य स्तोत्रं तस्त महात्मनः ।
अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीडितः ॥ ६ ॥

इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम् ॥ ७ ॥

मृत्युञ्जयमिदं पुण्यं मृत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥ ८ ॥

य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥ ९ ॥

हृत्पद्ममध्ये पुरुषं पुराणं

नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्यादपि राजमानं
मृत्युं स योगी जितवांस्तदैव ॥ १० ॥

॥ इति शिवम् ॥

mārkaṇḍeya uvāca

nārāyaṇaṃ sahasrākṣaṃ padmanābhaṃ purātanam |
praṇato.asmi hṛṣīkeśaṃ kiṃ me mṛtyuḥ kariṣyati || 1 ||

govindaṃ puṇḍarīkākṣamanantamajamavyayam |
keśavaṃ ca prapanno.asmi kiṃ me mṛtyuḥ kariṣyati || 2 ||

vāsudevaṃ jagadyoniṃ bhānuvarṇamatīndriyam |
dāmodaraṃ prapanno.asmi kiṃ me mṛtyuḥ kariṣyati || 3 ||

bhūtātmānaṃ mahātmānaṃ jagadyonimayonijam |

viśvarūpaṃ prapanno.asmi kiṃ me mṛtyuḥ kariṣyati || 4 ||

sahasraśirasaṃ devaṃ vyaktāvyaktaṃ sanātanam |
mahāyogaṃ prapanno.asmi kiṃ me mṛtyuḥ kariṣyati || 5 ||

ityudīritamākarṇya stotraṃ tasta mahātmanaḥ |
apayātastato mṛtyurviṣṇudūtaiśca pīḍitaḥ || 6 ||

iti tena jito mṛtyurmārkaṇḍeyena dhīmatā |
prasanne puṇḍarīkākṣe nṛsiṃhe nāsti durlabham || 7 ||

mṛtyu¤jayamidaṃ puṇyaṃ mṛtyupraśamanaṃ śubham |
mārkaṇḍeyahitārthāya svayaṃ viṣṇuruvāca ha || 8 ||

ya idaṃ paṭhate bhaktyā trikālaṃ niyataḥ śuciḥ |
nākāle tasya mṛtyuḥ syānnarasyācyutacetasaḥ || 9 ||

hṛtpadmamadhye puruṣaṃ purāṇaṃ
nārāyaṇaṃ śāśvatamādidevam |
sa¤cintya sūryādapi rājamānaṃ

mṛtyuṃ sa yogī jitavāṃstadaiva || 10 ||

|| iti śivam ||

www.kamakotimandali.com